S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



**Illegible,** *a.* दुर्वाच्य, अव्यक्ताक्षर, अस्पष्टाक्षर, अस्पष्ट-अव्यक्त-वर्ण.

**Illegitimate,** *a.* अन्याय्य, विधिविरुद्ध; *See* **Illegal. 2** विजात, जारजात, जारज, असतीप्रसूत, अनौरस, विजन्मन्, जारोत्पन्न. **3** कृत्रिम, कृतक, कल्पित; 'an i. child' अनौरसः-सी, जारजः-जा, दासीपुत्रः, कौलटेयः-यी, कौलटेरः-री, बंधकी-उपस्त्री-सुतः-ता, बंधुलः, कौलटिनेयः-यी. **-ly,** *adv.* विजन्मना; अधर्मेण. **-Illegitimacy,** *s.* विजन्मन् *m.*, वैजात्यं, अनौरसत्वं.

**Illiberal,** *a.* अनुदार, कृपण, कृपणबुद्धि-चेतस्-स्वभाव, (lit. and fig.); अत्याग-अदान-शील, अवदान्य. **-ity,** *s.* अत्यागः, अवदान्यत्वं, अनौदार्यं, कार्पण्यं, नीचता, दीनता.

**Illicit,** *a.* प्रति-नि-षिद्ध, अधर्म्य, अन्याय्य, नियम-धर्म-विरुद्ध, व्यवहारविरोधिन्.

**Illiterate,** *a.* अशिक्षित, अप्रबुद्ध, असंस्कृत, अव्युत्पन्न, विद्या-ज्ञान-हीन, निरक्षर, अनक्षर, असंस्कृतचित्त.

**Illimited,-able,** *a.* निरवधि; अनंत, अमेय, असीम, अमित, अमर्याद; *See* **Endless.**

**Illogical,** *a.* अयुक्तिसिद्ध, न्यायविरुद्ध-विपरीत, अन्यायानुसारिन्, अन्याय्य, अतार्किक (की *f.*); 'i. conclusion' अपसिद्धांतः, अविनिगमः. **-ly,** *adv.* न्यायविरुद्धं.

**Illude,** *v. t.* वंच् 10, मुह् c., प्रतॄ c.; *See* **Cheat. -Illusion,** *s.* माया, प्रपंचः, इंद्रजालं, अलीकता, अविद्या; *See* **Delusion. Illusive, -Illusory,** *a.* मायिन्, अलीक, ऐंद्रजालिक; *See* **Delusive.**

**Illume, Illumine, Illuminate,** *v. t* द्युत्- c., प्रकाश् c. उद्भास् c., उद्दीप् c., वि-,राज् c., भ्राज् c., उज्ज्वल् c. **2** (पत्राणि) रंज् c. **-Illumination,** *s.* उद्भासनं, द्योतनं, प्रकाशनं, उज्ज्वलनं, दीप्ति-द्युति-*f.*, भ्राजिष्णुता. **2** (i. s) दीपालि *f.*, दीपमाला-समूहः, दीपोत्सवः. **3** पत्ररंजनं. **-Illuminator,** *s.* द्योतकः, प्रकाशकः, दीपकः. **2** पत्ररंजकः.

**Illustrate,** *v. t.* व्या-ख्या 2 P, व्या-चक्ष् 2 A, स्पष्टीकृ 8 U, विवृ 5 U; उदा-हृ 1 P, निदृश् c., निदर्शनेन व्या-ख्या, व्यक्ती-विशदी-कृ, चित्रेण स्पष्टीकृ, प्रकाश् c., द्युत् c., शुभ् c., दीप् c, चित्रादिना शुभ् c. **-ion,** *s.* उदाहरणं, दृष्टांतः, निदर्शनं, व्याख्या-ख्यानं, प्रकाशनं, निरूपणं. **-ive,** *a.* प्रकाशक, दार्ष्टांतिक (की *f.*). **-or,** प्रकाशकः, निदर्शकः, व्याख्यातृ *m.*

**Illustrious,** *a.* विश्रुत, ख्यात, प्रथित, प्रसिद्ध, महायशस्क; *See* **Famous. 2** विशिष्ट, उत्तम, उत्कृष्ट, परम, प्रमुख, महत्. **-ly,** *adv.* विश्रुतं, प्रथितयशसा, विशिष्टतया. **-ness,** *s.* विश्रुति-ख्याति- *f.*

**Image,** *s.* प्रतिमा, मूर्ति *f.*, प्रतिकृति *f.*-मूर्तिः-मानं-रूपं, प्रतिच्छंदकः **2** प्रतिबिंबं, बिंबं, छाया, प्रतिच्छाया, प्रतिच्छंदः-दकं; 'this youth is the complete i. of Râma' रामस्याकृतिरस्मिन् शिशौ संपूर्णं प्रतिबिंबिता (U. 4). **3 Idea,** q. v.; 'iron i.' लोहप्रतिमा, स्थूणा, सू(शू)र्मी. **-*v. t.*** मनसा क्लृप् c. or चिंत् 10, प्रतिबिंबयति (D.); 'i. various shapes' तैस्तैराकृतिविस्तैररनुगताः (Mr. 5). **-ery,** *s.* मनः-कल्पना-सृष्टि *f.*-संकल्पः, भावना, वासना. **2** उपलक्षणं, लक्षणा. **3** आभासः, आडंबरः, अनुकारः.

**Imagine,** *v. t.* मनसा क्लृप् c., सं-परि°; सं-वि-भू c., सृज् 6 P, ध्यै 1 P. **2** मन् 4 A, गण् 10, चिंत् 10, तर्क् 10, उत्प्रेक्ष् 1 A, बुध् 1 P, अव-इ 2 P, अवगम् 1 P, उपलभ् 1 A. **-able,** *a.* संभाव्य, चिंतनीय, बोधगम्य; 'with all i. ease' मनसोऽप्यगोचरीभूतया-मनसाऽप्यकल्प्यमानया-लीलया. **-ary,** *a.* मनःकल्पित, वासना-भावना-सृष्ट, मनोरथसृष्ट, मानस (सी *f.*), काल्पनिक (की *f.*), संकल्पज. **2** अमूलक, असत्य, मायामय (यी *f.*). **-ation,** *s.* भावना-नं, कल्पना-नं, संकल्पः, वासना, मनःकल्पना. **2** (Faculty of i.) कल्पना-तर्क-शक्ति *f.*, भावना, उपलब्धि *f.* **-ative,** *a.* कल्पक, विभावक, भावनापर, कल्पनाशील.

**Imbecile,** *a.* दुर्बल, अशक्त, क्षीणबल; *See* **Feeble. 2** (In mind) न्यूनबुद्धि, अल्प-विकल-मति, बालिश, कृपणबुद्धि. **-ity,** *s.* दौर्बल्यं, न्यूनबुद्धिता, बालिशत्वं.

**Imbed,** *v. i.* अंतर्गम् 1 P, निविश् 6 P.

**Imbibe,** *v. t.* नि-पा 1 P, आ-पा, शुष् c. **2** (Fig.) अधिगम् 1 P, मनसा ग्रह् 9 U or आकल् 10 (कलयति) or उपलभ् 1 A.

**Imbricate,** *v. t.* अतिव्याप् 5 P.

**Imbroglio,** *s. See* **Embroglio.**

**Imbrue,** *v. t.* सिच् 6 P, लिप्, 6P, उक्ष् 1 P, क्लिद् c.; अंज् 7 P, दिह् 2 U; 'i. ed with blood' रक्ताक्त, रक्तक्लिन्न.

**Imbue,** *v. t.* अभिरंज् c. **2** शास् 2 P, उपदिश् 6 P, शिक्ष् c.

**Imitate,** *v. t.* अनुकृ 8 U (oft. with gen.), अनुगम्-सृ 1 P, अनु-इ-या 2 P, अनुवृत् 1 A, अनुवि-धा 3 U, अनुवद् 1 P, अनुहृ 1 P, विडंब् 10. **-ion,** *s.* अनुकारः-करणं, अनुकृति *f.*, विडंबनं, अनुवृत्ति *f.*, अनुसरणं. **2** उपमानं, प्रतिरूपं, सादृश्यं. **-ive,** *a.* अनुकरणशील, अनुकारिन्, अनुगामिन्. **-or,** *s.* अनुकर्तृ *m.*, अनुकारकः, अनुयायिन्-अनुकारिन् *m.*, अनुगतिकः.

**Immaculate,** *a.* निष्कलंक, निर्मल, अकल्मष, अनघ, निर्दोष, विमल.

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007